# संस्कृतवार्ता:

**दिनाङ्क :-19.09.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**मन्त्रिमण्डलस्य निर्णय: (एकं राष्ट्रम एकं निर्वाचनम्)**

**केन्द्रप्रशासनेन एकं राष्ट्रम् एकं निर्वाचनमिति विषयमभिलक्ष्य निर्मिताया: उच्चस्तरीयाया: समित्या: अनुशंसा स्वीकृता। ह्य: नवदिल्ल्यां वार्ताहरान् सम्बोधयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णव: उक्तवान् यत् प्राक्तन-राष्ट्रपते: रामनाथकोविन्दस्य आध्यक्ष्ये निर्मितया उच्चस्तरीयया समित्या विभिन्नानां दलानां प्रतिनिधय: हितधारका: विषयविज्ञाश्च परामृष्टा:। अनया अनुशंसितमस्ति यत् लोकसभाविधान-सभयो: निर्वाचनम् एकेन सहैव भविष्यति, पञ्चायत-नगरनिगमानाञ्च निर्वाचनानि सामान्यनिर्वाचनानां शतदिवसेषु एव भवेयुरिति।**

**मन्त्रिणा प्रोक्तं यत् प्रशासनेन देशस्य विज्ञान-प्रौद्योगिक-क्षेत्रयो: संवर्धनाय चन्द्रयानस्य चतुर्थाभियानाय वीनसआर्बिटर-इत्यस्मै अभियानायापि स्वीकृति: प्रदत्ता।**

**विश्वखाद्यभारतम्**

**चतुर्दिवसीय: वर्ल्डफूडइण्डिया इति विश्वखाद्यभारतमिति उत्सव: अद्यारभ्य नवदिल्ल्याम् आरप्स्यते। खाद्य-प्रसंस्करण-उद्योगमन्त्रालयेन ख्यापितं यत् एतस्मिन् चतुर्दिवसीयकार्यक्रमे नवति: देशा: षड्विंशति: च राज्यानि केन्द्रशासितप्रदेशा: अष्टादश केन्द्रीयमन्त्रालया: च भागं ग्रहीष्यन्ति। जापानदेश: सहभागिदेशो भविष्यति तथा च वियतनाम-ईरानदेशौ प्रमुखौ भविष्यत:। कार्यक्रमावधौ खाद्यप्रसंस्करण-क्षेत्रे नवाचारस्य प्रौद्योगिक्या: स्थिरतायाश्च प्रमुखाभिसरणं भविष्यति।**

जम्मूकश्मीरविधानसभा

जम्मूकश्मीर विधानसभा-निर्वाचनस्य प्रथमचरणीयं सप्त जनपदानां चतुर्विंशति आसनेभ्यः मतदानं ह्यः शान्तिपूर्णरीत्या सम्पन्नम्। विगतेषु पञ्चत्रिंशत्वर्षेषु बृहत्तमस्तरे मतदातारः मतदानानि कृतवन्तः। प्रथमे चरणे एतस्मिन् एकषष्टीः प्रतिशतं यावत् मतदानं समनुष्ठितम्। पुलवामा-शोपियान्-कुलगाम-किश्तवाड़-अनन्तनाग-रामबन-डोडा-जनपदेषु मतदानं सम्यक्-रीत्या प्रतिपादितम्। निर्वाचनायोगेन सूचितं यत् मतदातृकेन्द्रेषु यूनां महिला-मतदातृणाम् संख्या अधिकमासीत्। या हि जम्मू-कश्मीरे लोकतन्त्रस्य वर्धमानस्य प्रभावस्य प्रमाणमस्ति।

प्रधानमन्त्री-वर्धायात्रा

प्रधानमन्त्री नरेन्द्रमोदी श्वः महाराष्ट्रस्य वर्धास्थलस्य यात्रां करिष्यति। तत्रासौ राष्ट्रिय-प्रधानमन्त्रि-विश्वकर्मा-कार्यक्रमे भागं भजिष्यति। कार्यक्रमावधौ प्रधानमन्त्री प्रधानमन्त्रि-विश्वकर्मा-लाभार्थिभ्यः प्रमाणपत्राणि ऋणं च प्रदास्यति। तदनु श्रीमोदी महाराष्ट्रस्यैव अमरावती-जनपदे पीएम-मेगा-इण्टीग्रेटेड-टेक्सटाइल्स-रीजन्स-एण्ड-अपैरल इत्याख्यस्य उद्यानस्य आधारशिलां संस्थापयिष्यति।

कर्णाटक-इसरोइति

विक्रमसाराभाई-अन्तरिक्ष-केन्द्रस्य निदेशकः डॉ. एस. उन्नीकृष्णन नायरः सूचितवान् यत् भारतीयान्तरिक्षानुसन्धानसङ्घटनम् इति गगनयानकार्यक्रमस्यान्तर्गतं मानवरहित-अभियानाय सज्जितम् अस्ति। ह्यः बेङ्गलुरुनगरे अष्टमस्य बेंगलुरु-स्पेस-एक्सपो इत्याख्यस्य कार्यक्रमावसरे वार्ताहरान् सम्बोधयन् डॉ. नायरः अवदत् यत् अस्मै मानवरहिताभियानाय आर्बिटल-इति प्रारूपं निर्मीयते, शीघ्रमेव च श्रीहरिकोटां प्रति प्रेषयिष्यते। अभियानमिदं वर्षान्ते निर्धारितमस्ति।

एन्.पी.एस्.वात्सल्यः

वित्तमन्त्री निर्मलासीतारामन् इत्येषा ह्यः नवदिल्ल्यां एन्.पी.एस्. इति वात्सल्य-योजनाम् उद्घाटितवती। अनया योजनया बालैः संग्रहितस्य धनस्य रक्षणं भवति अपि च ते उच्चप्रतिफलमपि प्राप्स्यन्ति।

क्रिकेट-वार्ताः

भारतीय क्रिकेट्-क्रीडादलम् अद्यारभ्य चेन्नैनगरस्य एम्.ए. चिदम्बरम क्रीडाङ्गणे आरभ्यमाणस्य द्वयोः क्रीडयोः श्रृङ्खलायाः प्रथमे द्वन्द्वे बाङ्ग्लादेशेन सह सामुख्यं करिष्यति।